# आदर्शप्रश्नपत्रम्

संस्कृतव्याकरणम्  Sanskrit Vyakaranam

(346)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)                                                   पूर्णाङ्काः (Full Marks) - 100

---

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 7, [C] भागे 5, [D] 5, [E] भागे 4 इति आहत्य 41 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं - बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् - वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

[A] विशतिप्रश्नानां (1-20) प्रदत्तविकल्पेषु युक्तं विकल्पं चिनुत। 20 (1x20)

1) I) युक्तयोगः इत्यत्र क्तप्रत्ययान्तस्य पूर्वनिपातविधायकं किं सूत्रम्। 1

(क) क्तक्तवतू निष्ठा (ख) निष्ठा (ग) उपसर्जनं पूर्वम् (घ) लघ्वक्षरं पूर्वम्।

अथवा

II) शीतोष्णम् इत्यत्र द्वन्द्वः केेन।

(क) द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (ख) जातिरप्राणिनाम् (ग) येषां च विरोधः शाश्वतिकः (घ) विप्रतिषिद्धं चानधिकरणवाचि।

2) I) प्रायेण उभयपदार्थप्रधानः कः समासः। 1

(क) अव्ययीभावः (ख) तत्पुुरुषः (ग) द्वन्द्वः (घ) बहुव्रीहिः।

अथवा

II) प्रायेण अन्यपदार्थप्रधानः कः समासः।

(क) अव्ययीभावः (ख) तत्पुरुषः (ग) द्वन्द्वः (घ) बहुव्रीहिः।

3) I) जलजाक्षी इत्यत्र कः प्रत्ययः। 1

(क) षप्रत्ययः (ख) अच्प्रत्ययः (ग) षच्प्रत्ययः (घ) अणप्रत्ययः।

अथवा

II) द्विमूर्धः इत्यत्र कः प्रत्ययः।

(क) षप्रत्ययः (ख) अच्प्रत्ययः (ग) षच्प्रत्ययः (घ) अणप्रत्ययः।

4) I) संख्यासुपूर्वस्य इति सूत्रे का परिभाषा प्रवर्तते। 1

(क) अनेकाल्शित्सर्वस्य (ख) ङिच्च (ग) अलोऽन्त्यस्य (घ) आद्यन्तौ टकितौ।

अथवा

II) परस्परनिरपेक्षस्य अनेकस्य एकस्मिन् अन्वयः कः।

(क) समुच्चयः (ख) अन्वाचयः (ग) इतरेतरयोगः (घ) समाहारः।

5) I) सामर्थ्याभावात् कुत्र कुत्र न समासः। 1

(क) समुच्चये अन्वाचये (ख) अन्वाचये इतरेतरयोगे (ग) इतरेतरयोगे समाहारे (घ) समुच्चये समाहारे।

अथवा

II) मित्रावरुणौ इत्यत्र क आदेशः। 1

(क) अनङ् (ख) आनङ् (ग) अङ् (घ) अट्।

6) I) परिनिष्ठितशब्दस्य अर्थः कः। 1

(क) व्याकरणसंस्कृतः (ख) लौकिकः (ग) अलौकिकः (घ) व्याकरणासंस्कृतः।

अथवा

II) प्राचार्यः इत्यत्र केन सह समासः।

(क) प्रथमान्तेन (ख) द्वितीयान्तेन (ग) तृतीयान्तेन (घ) चतुर्थ्यन्तेन।

7) I) सर्पिष्पाशम् इति कस्य सूत्रस्य उदाहरणम्। 1

(क) इणः षः (ख) कस्कादिषु च (ग) सोऽपदादौ (घ) आदेशप्रत्यययोः।

अथवा

II) महायशस्कः इति कस्य सूत्रस्य उदाहरणम्।

(क) उरःप्रभृतिभ्यः कप् (ख) शेषाद्विभाषा (ग) इनः स्त्रियाम् (घ) पूर्णाद्विभाषा।

8) I) द्वन्द्वे घिसंज्ञस्य पूर्वनिपाते किम् उदाहरणम्। 1

(क) हरिहरौ (ख) केशवार्जुनौ (ग) धर्मार्थौ (घ) शिवकेशवौ।

II) कुशकाशम् इत्यत्र कस्य पूर्वनिपातः।

(क) घिसंज्ञकस्य (ख) अल्पाच्तरस्य (ग) अजाद्यन्तस्य (घ) लघ्वक्षरस्य।

9) I) वयसा अधिकारेण वा निकृष्टस्य भृत्यादेः प्रवर्तनं किम्। 1

(क) विधिः (ख) निमन्त्रणम् (ग) आमन्त्रणम् (घ) अधीष्टः।

अथवा

II) आशिषि लिङः यासुट् किं भवति।

(क) ङित् (ख) पित् (ग) कित् (घ) गित्।

10)I) अभ्यासस्य आदेः अतः किं भवति। 1

(क) दीर्घः (ख) वृद्धिः (ग) गुणः (घ) द्वित्वम्।

अथवा

II) "उरत्" इत्यनेन किं विधीयते।

(क) अकारः (ख) लोपः (ग) अनुप्रयोगः (घ) लुक्।

11)"अकृत्सार्वधातुकयोर्दीर्घः" इत्यनेन अजन्ताङ्गस्य दीर्घः कदा भवति। 1

(क) यादौ प्रत्यये परे (ख) किति परे (ग) ङिति परे (घ) सार्वधातुके परे।

12)गुणवृद्धिनिषेधे किं निमित्तं नास्ति। 1

(क) ङित् (ख) पित् (ग) कित् (घ) गित्।

13)"गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु" इत्यत्र गातिस्थाघुपाभूभ्यः इति पदं कीदृशम्। 1

(क) तृतीयाविभक्त्यन्तम् (ख) चतुर्थीविभक्त्यन्तम् (ग) पञ्चमीविभक्त्यन्तम् (घ) षष्ठीविभक्त्यन्तम्।

14)अभ्यासकवर्गहकारयोः स्थाने कः विधीयते। 1

(क) चवर्गः (ख) टवर्गः (ग) तवर्गः (घ) कवर्गः।

15)चान्तेषु कः धातुः अनुदात्तः। 1

(क) पच् (ख) मुच् (ग) सिच् (घ) रच्।

16)"अत एकहल्मध्येऽनादेशादेर्लिटि" इत्यत्र सन्धिविच्छेदः कः। 1

(क) अतः एकहल् मध्ये अनादेशादेः लिटि (ख) अतः एकहल्मध्ये अनादेशादेः लिटि

(ग) अत एकहल्मध्ये अनादेशादेर्लिटि (घ) अत एकहल्मध्ये अनादेशादेः लिटि।

17)कस्माद् धातोः परस्य णल औकारादेशः भवति। 1

क) आदन्तात् (ख) अदन्तात् (ग) इदन्तात् (घ) हलन्तात्।

18)"अस्तिसिचोऽपृक्ते" इत्यत्र अस्तिसिचः इति पदस्यार्थः कः। 1

(क) अस्धातोः सिच्प्रत्ययात् (ख) अस्धातोः सिच्प्रत्ययस्य (ग) विद्यमानात् सिच्प्रत्ययात् (घ) विद्यमानस्य सिच्प्रत्ययस्य।

19)"ओर्गुणः" इत्यनेन किं विधीयते। 1

(क) गुणः (ख) वृद्धिः (ग) दीर्घः (घ) सम्प्रसारणम्।

20) गर्गादिगणपठितात् शब्दात् कः प्रत्ययः। 1

(क) नञ् (ख) स्नञ् (ग) यञ् (घ) ष्यञ्।

**[B] दशप्रश्नानां (21-35) यथानिर्देशम् उत्तराणि लिखत। यत्र प्रश्ने विकल्पः दत्तः अस्ति तत्र अन्यतरः समाधेयः 2x15=30**

21) युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. अव्ययीभावसमासः | क पूर्वपदार्थप्राधान्य |
| II. अतिमालः | ख सूपप्रति |
| | ग उपकृष्णम् |

22) सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. नेदिथ | क अचो ञ्णिति |
| II. अतिमालः | ख इट ईटि |
| | ग थलि च सेटि |

अथवा

सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. जग्मतुः | क ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् |
| II. अकटीत् | ख अत आदेः |
| | ग गमहनजनखनघसां लोपः क्ङित्यनङि |

23) सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. वासिष्ठः | क तदस्यास्त्यस्मिन्निति मतुप् |
| II. व्रीहिमान् | ख ऋष्यन्धकवृष्णिकुरुभ्यश्च |
| | ग व्रीह्यादिभ्यश्च |

24) सिद्धशब्देन सह प्रत्ययस्य युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. रूप्यः | क फ प्रत्यय |
| II. गार्ग्यायणः | ख यत्प्रत्यय |
| | ग यप्प्रत्यय |

25) सिद्धशब्देन सह प्रत्ययस्य युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| I. वर्णवान् | क इन्प्रत्यय |
| II. बाहविः | ख मतुप् प्रत्यय |
| | ग इञ्प्रत्यय |

26) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. वंशे पित्रादिषु जीवत्सु पौत्राद्यपत्यस्य ................संज्ञा भवति।

II. 'पुत्रम् अध्यापयेद् भवान्' इत्यत्र लिङर्थः ................. अस्ति।

27) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. आतीत् - अत्र ........... सूत्रद्वारा सकारस्य लोपः भवति।

II. **चि क्षि उस्** इति प्रक्रियास्थितौ ......... आदेशः भवति।

28) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. 'उन्नताः दन्ताः अस्य' इत्यर्थे ................ प्रत्ययः भवति।

'प्रशस्ता वाक् अस्य' इति विग्रहे रूपं ........... भवति।

अथवा

I. केशाः अस्य सन्ति – इति विग्रहे संभवानां रूपाणां संख्या .......... अस्ति।

II. उत्तरपदार्थप्राधान्यं ........... समासस्य वैशिष्ट्यम्।

29) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. 'तसौ मत्वर्थे' इदं .......... संज्ञाविधायकं सूत्रम्।

II. 'कुशुम्बेन निर्वृत्ता नगरी' इत्यर्थे ............. रूपं 'तस्य निवासः' सूत्रस्य उदाहरणमस्ति।

30) रिक्तस्थानं योग्यपदेन पूरयत – 2

I. 'राष्ट्रियः' इति शब्दः ................ तद्धितप्रत्ययेन व्युत्पद्यते है।

II. 'तसौ मत्वर्थे' इति सूत्रेण .............संज्ञा विधीयते।

31) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

I. णिति तद्धिते प्रत्यये परतः आदिवृद्धिः प्रप्यते।

II. पूर्वं सांख्याशब्दः भवति चेत् सः द्विगुः समासः भावति।

32) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

I. द्विगुः समासः तत्पुरुषसमासस्य हि एको भेदः।

II. बहुव्रीहिसमासे प्रायः उत्तरपदार्थः प्रधानः भवति।

अथवा

I. 'ईशकृष्णौ' इदं इतरेतरद्वन्द्वसमासस्य उदाहरणम्।

II. उपसर्जनस्य निर्देशः सप्तमीविभक्त्या क्रियते।

33) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

I. 'अत उपधायाः' यह संज्ञा सूत्र का उदाहरण है।

II. स्वादिगण की धातुओं के साथ 'श्नु' विकरण का प्रयोग होता है।

34) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

I. 'चोरयांचक्रे' इदं 'णिचश्च' सूत्रस्य उदाहरणमस्ति।

II. 'अहंयुः' तथा 'शुभंयुः' एकस्य एव सूत्रस्य उदाहरणे स्तः।

35) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

I. 'वैश्वामित्रं' इदं 'सास्य देवता' सूत्रस्य उदाहरणमस्ति।

II. 'तलन्त'शब्दाः प्रायः स्त्रीलिंगे भवन्ति।

[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2x6=12

36)बैदी इत्यत्र कः प्रत्ययः केन च विधीयते। 2

37)भवन्ती इति कस्य सूत्रस्य उदाहरणम्। "द्विगोः" इति सूत्रस्य एकम् उदाहरणं लिखत। 2

38)एधसे इत्यत्र थासः स्थाने से इति विधायकं सूत्रं किम्। कस्माद् इजादेः धातोः आम्प्रत्ययः। 2

39)जक्षुः इत्यत्र सस्य मूर्धन्यादेशः केन सूत्रेण। तस्य सूत्रस्यार्थश्च कः। 2

40)ह्यस्तनम् इत्यत्र विग्रहः कः। अत्र कः प्रत्ययः केन सूत्रेण। 2

41)"गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति सूत्रस्य कर्मार्थे भावार्थे च उदाहरणद्वयं प्रतिपादयत। 2

[D] षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18

42)टाब्डाप्चाप्प्रत्यययानां विधायकानि सूत्राणि सार्थानि प्रतिपादयत। 3

43)"ऋन्नेभ्यो ङीप्" इति सूत्रम् "उगितश्च" इति सूत्रं वा सप्रसङ्गं व्याख्यात। 3

44)नर्तकी इति दाक्षी इति वा रूपं ससूत्रं साधयत। 3

45)स्वादिगणे कः विकरणप्रत्ययः। तद्विधायकं सूत्रं सार्थं प्रतिपादयत। 3

46)"ये च" इति सूत्रम् "ई हल्यघोः" इति सूत्रं वा सप्रसङ्गं व्याख्यात। 3

47)"जिह्वामूलाङ्गुलेश्छ" इति सूत्रं "ग्रामाद्यखञौ" इति सूत्रं वा सप्रसङ्गं व्याख्यात। 3

[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20

48) "जातेरस्त्रीविषयादयोपधात्" इति सूत्रं "इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्" इति सूत्रं वा सप्रसङ्गं व्याख्यात।

5

49) "इजादेश्च गुरुमतोऽनृच्छः" इति सूत्रं "आत्मनेपदेष्वनतः" इति सूत्रं वा सप्रसङ्गं व्याख्यात।

5

50) सुषुवे रुणद्धि इति वा रूपं ससूत्रं साधयत।

5

51) तरप्तमप्प्रत्ययौ आश्रित्य टीका लेख्या।

5

--)(O)(--

संस्कृतव्याकरणम्  Sanskrit Vyakaranam MS

(346)

[A] विशतिप्रश्नानां (1-20) प्रदत्तविकल्पेषु युक्तं विकल्पं चिनुत। 20 (1x20)

1) I) (ख) निष्ठा 1

अथवा

III) (घ) विप्रतिषिद्धं चानधिकरणवाचि।।

2) I) (ग) द्वन्द्वः । 1

अथवा

III) (घ) बहुव्रीहिः।

3) I) (ग) षच्प्रत्ययः 1

अथवा

III) (ग) षच्प्रत्ययः

4) I) (ग) अलोऽन्त्यस्य 1

अथवा

III) (क) समुच्चयः

5) I) (क) समुच्चये अन्वाचये 1

अथवा

II) (ख) आनङ् 1

6) I) (क) व्याकरणसंस्कृतः 1

अथवा

II) (क) प्रथमान्तेन

7) I) (क) इणः षः 1

अथवा

III) (ख) शेषाद्विभाषा

8) I) (क) हरिहरौ 1

अथवा

III) (घ) लघ्वक्षरस्य।

9) I) (क) विधिः 1

अथवा

III) (ग) कित्

10) I) (क) दीर्घः 1

अथवा

III) (क) अकारः

11) (क) यादौ प्रत्यये परे 1

12) (ख) पित् 1

13) (ग) पञ्चमीविभक्त्यन्तम् 1

14) (क) चवर्गः 1

15) (घ) रच्। 1

16) (ख) अतः एकहल्मध्ये अनादेशादेः लिटि 1

17) क) आदन्तात् 1

18) (ग) विद्यमानात् सिच्प्रत्ययात् 1

19)(क) गुणः 1

20)(ग) यञ् 1

[B] दशप्रश्नानां (21-35) यथानिर्देशम् उत्तराणि लिखत। यत्र प्रश्ने विकल्पः दत्तः अस्ति तत्र अन्यतरः समाधेयः 2x15=30

21)युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. अव्ययीभावसमासः | ग उपकृष्णम् |
| IV. अतिमालः | क पूर्वपदार्थप्राधान्य |
| | ख सूपप्रति |

22)सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. नेदिथ | ग थलि च सेटि |
| IV. अतिमालः | क अचो ञ्णिति |
| | ख इट ईटि |

अथवा

सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. जग्मतुः | ग गमहनजनखनघसां लोपः क्ङित्यनङि |
| IV. अकटीत् | क ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् |
| | ख अत आदेः |

23)सूत्रोदाहरणयोः युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. वासिष्ठः | ख ऋष्यन्धकवृष्णिकुरुभ्यश्च |
| IV. व्रीहिमान् | ग व्रीह्यादिभ्यश्च |
| | क तदस्यास्त्यस्मिन्निति मतुप् |

24)सिद्धशब्देन सह प्रत्ययस्य युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. रूप्यः | ग यप्प्रत्यय |
| IV. गार्ग्यायणः | क फ प्रत्यय |
| | ख यत्प्रत्यय |

25)सिद्धशब्देन सह प्रत्ययस्य युक्तियुक्तं मेलनं कुरुत 2

| | |
|---|---|
| III. वर्णवान् | ख मतुप् प्रत्यय |
| IV. बाहविः | ग इञ्प्रत्यय |
| | क इन्प्रत्यय |

26)रिक्तस्थानं योग्यपदेन पूरयत – 2

III. युवसंज्ञा

IV. अधीष्ट

27) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. इट ईटि

IV. इयङादेशः

28) रिक्तस्थानं योग्यपदेन पूरयत – 2

II. उरच्

III. वाग्मी

अथवा

III. चत्वारि

IV. तत्पुरुष

29) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. भसंज्ञा

IV. कौशाम्बी

30) रिक्तस्थानं योग्यपदेन पूरयत – 2

III. ‘ख’ तद्धिते प्रत्यये

IV. भसंज्ञा

31) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

III. सत्यम्

IV. सत्यम्

32) निम्नलिखिविधानेषु सत्यम् असत्यम् वा इति निर्धारणं कुरुत 2

III. सत्यम्

IV. असत्यम्

अथवा

III. सत्यम् ।

IV. उपसर्जनस्य निर्देशः सप्तमीविभक्त्या

33) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

III. असत्यम्

IV. सत्यम्

34) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

III. सत्यम्

IV. सत्यम्

35) निम्नलिखितविधानेषु सत्यम्-असत्यम् वा इति निर्धारणं कुरुत 2

III. सत्यम्

IV. सत्यम्

[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2x6=12

36) बैदी इत्यत्र ङीन् प्रत्ययः। अत्र विधायकं सूत्रं "शाङ्र्गरवाद्यञो ङीन्" इति।

2

37) भवन्ती इति "उगितश्च" इति सूत्रस्य उदाहरणम्। "द्विगोः" इति सूत्रस्य त्रिलोकी इति उदाहरणम्। 2

38) एधसे इत्यत्र थासः स्थाने से इति विधायकं सूत्रं "थासः से" इति। इजादिः यो धातुः गुरुमान् ऋच्छत्यन्यः तस्माद् धातोः आम्प्रत्ययः। 2

39) जक्षुः इत्यत्र सस्य "शासिवसिघसीनां च" इति सूत्रेण मूर्धन्यादेशः विधीयते। तस्य सूत्रस्यार्थः - 'शासिवसिघसीनाम् इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्।' इति। 2

40) ह्यस्तनम् इत्यत्र ह्यः भवम् इति विग्रहः। अत्र ट्युप्रत्ययः ट्युल्प्रत्ययो वा "सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" इति सूत्रेण विधीयते। 2

41) "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति सूत्रेण कर्मार्थे भावार्थे च ष्यञ्प्रत्ययस्य उदाहरणं तावत् - जडस्य भावः कर्म वा जाड्यम् इति ब्राह्मणस्य भावः कर्म वा ब्राह्मण्यम् इति च। 2

[D] षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18

42) - टाप्प्रत्ययविधायकं सूत्रम् अर्थश्च।
डाप्प्रत्ययविधायकं सूत्रम् अर्थश्च।
चाप्प्रत्ययविधायकं सूत्रम् अर्थश्च। 3

43) "ऋन्नेभ्यो ङीप्" इति सूत्रम् "उगितश्च" इति सूत्रं वा

"ऋन्नेभ्यो ङीप्" इति सूत्रम् -

क) सूत्रार्थः

ख) उदाहरणम्।

अथवा

"उगितश्च" इति सूत्रम् -

क) सूत्रार्थः

ख) उदाहरणम्। 3

44) नर्तकी इति दाक्षी इति वा रूपं नर्तकी - वाक्यषट्केन रूपसाधनम्।

अथवा

दाक्षी - वाक्यषट्केन रूपसाधनम्।

3

45) स्वादिगणे
स्वादिगणे विकरणः श्नुप्रत्ययः
तद्विधायकं सूत्रम्
अर्थः 3

46) “ये च” इति सूत्रम् “ई हल्यघोः” इति सूत्रं

“ये च” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्।

अथवा

“ई हल्यघोः” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्। 3

47) “जिह्वामूलाङ्गुलेश्च” इति सूत्रं “ग्रामाद्यखञौ” इति सूत्रं

“जिह्वामूलाङ्गुलेश्च” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्।

अथवा

“ग्रामाद्यखञौ” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्। 3

[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20

48) “जातेरस्त्रीविषयादयोपधात्” इति सूत्रं “इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्” इति सूत्रं वा

“जातेरस्त्रीविषयादयोपधात्” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्।

अथवा

“इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्। 5

49) “इजादेश्च गुरुमतोऽनृच्छः” इति सूत्रं “आत्मनेपदेष्वनतः” इति सूत्रं वा

“इजादेश्च गुरुमतोऽनृच्छः” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्।

अथवा

“आत्मनेपदेष्वनतः” इति सूत्रम् -

क) प्रसङ्गः

ख) सूत्रार्थः

ख) उदाहरणम्। 5

50) सुषुवे रुणद्धि इति वा रूपं

सुषुवे

अथवा

रुणद्धि 5

51) तरप्तमप्प्रत्ययौ आश्रित्य टीका

क) तरप्प्रत्ययः

ख) तमप् प्रत्ययः 5

--)(O)(--